# Rachayanti Kanchana-Shakuntassvam

# રચયન્તિ કાઞ્ચન-શકુન્તાસ્સ્વં

## Document Information

Text title : Mama BharatadeshaH so.ayam

File name : mamabhAratadeshaHsoayam.itx

Category : misc, sanskritgeet, hkmeher

Location : doc_z_misc_general

Author : Harekrishna Meher meher.hk at gmail.com

Transliterated by : Harekrishna Meher

Proofread by : Harekrishna Meher

Description/comments : Original Hindi Song : 'Jahaan Daal Daal Par' Film 'Sikandar-E-Azam (1965)'

Acknowledge-Permission: Dr. Harekrishna Meher

Latest update : February 1, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 1, 2024

*sanskritdocuments.org*

Rachayanti Kanchana-Shakuntassvam

# રચયન્તિ કાઞ્ચન-શકુન્તાસ્સ્વં

("જહાઁ ડાલ ડાલ પર" હિન્દી ચિત્રપટગીતસ્ય સંસ્કૃતાનુવાદઃ)

રચયન્તિ કાઞ્ચન-શકુન્તાસ્સ્વં પ્રતિશાખં યત્ર કુલાયમ્,
મમ ભારત-દેશઃ સોઽયમ્, મમ ભારત-દેશઃ સોઽયમ્ ।
અપિ સત્યમહિંસા ધર્મ આસ્પદં દધતે પ્રતિપદ-મેયમ્ ।
મમ ભારત-દેશઃ સોઽયમ્, મમ ભારત-દેશઃ સોઽયમ્ ॥

(જય ભારતિ ! જય ભારતિ ! જય ભારતિ ! જય ભારતિ !) ॥ ધ્રુવપદમ્ ॥

ઇયમવની સા ઋષિ-મુનિ-વ્રજો માલાં જપતીશ્વર-નામ્નઃ,
(હરિ ૐ, હરિ ૐ, હરિ ૐ, હરિ ૐ) ।
બાલોઽસ્તિ મોહનઃ પ્રત્યેકમ્, બાલા રાધા યદ્-ધામ્નઃ ।
  બાલા રાધા યદ્-ધામ્નઃ ।
સર્વાદૌ કુરુતે રવિરાવર્ત્તમ્, યત્રાગતઃ સ્વકીયમ્ ।
મમ ભારત-દેશઃ સોઽયમ્, મમ ભારત-દેશઃ સોઽયમ્ ॥ ૧॥

ગઙ્ગા યમુના પ્રવહન્તિ યત્ર વૈ કૃષ્ણા-સહ-કાવેરી,
યા ઉત્તર-દક્ષિણ-પૂર્વ-પશ્ચિમાન્ પાયયન્તિ સુધા-વારિ ।
  પાયયન્તિ સુધા-વારિ ।
ફલ-પુષ્પાણીદં ક્વચિત્ પ્રસૂતે, તનુતે કેસર-કાયમ્ ।
મમ ભારત-દેશઃ સોઽયમ્, મમ ભારત-દેશઃ સોઽયમ્ ॥ ૨॥

વૈચિત્ર્યમયી-ધરણેરસ્યાઃ પર્વાણ્યપિ વિચિત્ર-ભાસઃ,
ક્વચિત્ પ્રદીપ્તિ-દીપાવલ્યાઃ હોલી-વર્ણ-વિલાસઃ ।
  હોલી-વર્ણ-વિલાસઃ ।
ઇહ રાગ-રઙ્ગયો-ર્હાસ્ય-મુદાનાં ચતુર્દિશં પ્રાચુર્યમ્ ।
મમ ભારત-દેશઃ સોઽયમ્, મમ ભારત-દેશઃ સોઽયમ્ ॥ ૩॥

યસ્મિન્ શિવાલયા મન્દિર-માલા ગગનં સમ્ભાષન્તે,

પુનઃ ક્વચિદ્ વા નગરે દ્વારે  તાલં કોઽપિ ન દત્તે ।
    તાલં કોઽપિ ન દત્તે ।
આયાતઃ પ્રેમ્ણો નિનાદ્ય વેણુમ્, ઉભે પ્રભાતં સાયમ્ ।
મમ ભારત-દેશઃ સોઽયમ્,  મમ ભારત-દેશઃ સોઽયમ્ ॥ ૪॥

રચયન્તિ કાઞ્ચન-શકુન્તાસ્સ્વં  પ્રતિશાખં યત્ર કુલાયમ્,
મમ ભારત-દેશઃ સોઽયમ્,  મમ ભારત-દેશઃ સોઽયમ્  ॥

(જય ભારતિ !  જય ભારતિ !  જય ભારતિ !  જય ભારતિ !)

મૂલ-હિન્દી-ગીતમ્ -  જહાઁ ડાલ-ડાલ પર સોને કી ચિડ઼િયાઁ કરતી હૈં બસેરા
ચલચિત્રમ્ - સિકંદર-એ-આજ઼મ (૧૯૬૫)
ગીતકારઃ - રાજેન્દ્ર-કૃષ્ણઃ
સઙ્ગીતકારઃ - હંસરાજ-બહલઃ ગાયકઃ - મોહમ્મદ-રફ઼ી

મૂલસ્વરાનુકૂલ-સંસ્કૃતાનુવાદકઃ - ડૉ હરેકૃષ્ણ-મેહેરઃ

Copyright Dr.Harekrishna Meher

*Rachayanti Kanchana-Shakuntassvam*
pdf was typeset on February 1, 2024

Please send corrections to *sanskrit@cheerful.com*